योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ५७

सप्तपञ्चाशः सर्गः ५७

श्रीवसिष्ठ उवाच ।

यदात्ममरिचस्यान्तश्चित्त्वात्तीक्ष्णत्ववेदनम् ।

तदहंतादि भेदादि देशकालादि चेत्यतः ।। १

यदात्मलवणस्यान्तश्चित्त्वाल्लवणवेदनम् ।

तदहंतादि भेदादि देशकालादि मत्स्थितम् ।। २

स्वतो यदन्तरात्मेक्षोश्चित्त्वान्माधुर्यवेदनम् ।

तदहंतादि भेदादि जगत्तत्त्वादि जृम्भितम् ।। ३

स्वतो यदात्मदृषदश्चित्त्वात्काठिन्यवेदनम् ।

तदहंतादि भेदादि देशकालादितां गतम् ।। ४

स्वतो यदात्मशैलस्य ज्ञतया जाड्यवेदनम् ।

तदहंतादि भेदादि भुवनादीति संस्थितम् ।। ५

स्वतो यदात्मतो यस्य चिद्द्रवत्वादिवर्तनम् ।

तदावर्ताद्यहंतादिभेदाद्याकारिता इव ।। ६

स्वतो यदात्मवृक्षस्य शाखादिस्तस्य वेदनम् ।

तदहंतादि भेदादि भुवनादीव सत्स्फुरत् ।। ७

यदात्मगगनस्यान्तश्चित्त्वाच्छून्यत्ववेदनम् ।

तदहंतादि भेदादि भुवनादीति भावनम् ।। ८

यदात्मगगनस्यान्तश्चित्त्वात्सौषिर्यवेदनम् ।

तदहंतादि भेदादि शरीरादि च दीपितम् ।। ९

स्वतो यदात्मकुड्यस्य नैरन्तर्यं निरन्तरम् ।

तदहंतादिभेदेन चित्ताद्बहिरिव स्थितम् ।। १०

स्वतो यदात्मसत्तायाश्चित्त्वात्सत्त्वैकवेदनम् ।
तदहंतादि भेदादि चेतनानीतिवत्स्थितम् ।। ११
अन्तरात्मप्रकाशस्य स्वतो यदवभासनम् ।

तदहंतादि चित्त्वादि जीव इत्येव वेद सः ।। १२
अन्तरस्ति यदात्मेन्दोश्चिद्रूपं चिद्रसायनम् ।
स्वत आस्वादितं तेन तदहंतादिनोदितम् ।। १३
परमात्मगुडस्यान्तर्यच्चित्स्वादूदयात्मकम् ।
तदेवास्वाद्यते तेन स्वतोऽहंतादि नान्तरे ।। १४
परमात्ममणेश्चित्त्वाद्यदन्तः कचनं स्वयम् ।
चेतनात्मपदे चान्तरहमित्यादि वेत्त्यसौ ।। १५
न च किंचन वेत्त्यन्तर्वेद्यस्यासंभवादिह ।
न चास्वादयति स्वादु स्वाद्यस्यासंभवादयम् ।। १६
न च किंचिच्चिनोत्यन्तश्चेत्यस्यासंभवे सति ।
विन्दते न च वा किंचिद्वेद्यस्यासंभवादसौ ।। १७
असदाभास एवात्मा अनन्तो भरिताकृतिः ।
स्थितः सदैवैकघनो महाशैल इवात्मनि ।। १८
अनया तु वचोभङ्ग्या मया ते रघुनन्दन ।
नाहंतादिजगत्तादिभेदोस्तीति निदर्शितम् ।। १९
न चित्तमस्ति नो चेता न जगत्तादिविभ्रमः ।
वृष्टमूकाम्बुदसितं शान्तं शाम्यति केवलम् ।। २०
यथावर्तादितामेति द्रवत्वाद्वारि वारिणि ।
तदाहंतादितामेति ज्ञप्ता ज्ञप्तौ ज्ञ आत्मनि ।। २१
यथा द्रवत्वं पयसि यथा स्पन्दः सदागतौ ।
अहंतादेशकालादि तथा ज्ञे ज्ञप्तिमात्रके ।। २२
ज्ञो ज्ञतायां शिव ज्ञानं जानाति ज्ञानबृंहया ।

ज्ञायतेऽहंतदि ज्ञेन जीवादीत्यभिजीवनैः ।। २३

यथोदेति ययाऽज्ञस्य तृप्तिर्ज्ञानेन यादृशी ।

अनन्ये वान्यता बुद्ध्वा स तथा जृम्भते तया ।। २४

जीवनं ज्ञातता ज्ञाता जीवनं जीवजीवनम् ।

अत्यन्तमस्ति नो भेदश्चिद्रूपत्वे ज्ञजीवयोः ।। २५

यथा ज्ञजीवयोर्नास्ति भेदो नाम तथैतयोः ।

भेदोऽस्ति न ज्ञशिवयोर्विद्धि शान्तमखण्डितम् ।। २६

सर्वं प्रशान्तमजमेकमनादिमध्य-

माभास्वरं स्वदनमात्रमचेत्यचिह्नम् ।

सर्वं प्रशान्तमिति शब्दमयी तु दृष्टि-

र्बोधार्थमेव हि मुधैव तदोमितीदम् ।। २७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे भेदनिरासो नाम सप्तपञ्चाशः सर्गः ।। ५७ ।।